# श्रीबालाष्टोत्तरशतनामस्तोत्रम् २

Shri Balashtottarashatanamastotram 2

sanskritdocuments.org

March 24, 2019

# Shri Balashtottarashatanamastotram 2

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् २

## Sanskrit Document Information

Text title : bAlAShTottarashatanAmastotram 2

File name : bAlAShTottarashatanAmastotram2.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Balasaparya

Latest update : August 23, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 24, 2019

*sanskritdocuments.org*

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् २

श्रीबाला श्रीमहादेवी श्रीमत्पञ्चासनेश्वरी ।
शिववामाङ्गसम्भूता शिवमानसहंसिनी ॥ १॥

त्रिस्था त्रिनेत्रा त्रिगुणा त्रिमूर्तिवशवर्तिनी ।
त्रिजन्मपापसंहर्त्री त्रियम्बककुटम्बिनी ॥ २॥

बालार्ककोटिसङ्काशा नीलालकलसत्कचा ।
फालस्थहेमतिलका लोलमौक्तिकनासिका ॥ ३॥

पूर्णचन्द्रानना चैव स्वर्णताटङ्कशोभिता ।
हरिणीनेत्रसाकारकरुणापूर्णलोचना ॥ ४॥

दाडिमीबीजरदना बिम्बोष्ठी मन्दहासिनी ।
शङ्खःग्रीवा चतुर्हस्ता कुचपङ्कजकुड्मला ॥ ५॥

ग्रैवेयाङ्गदमाङ्गल्यसूत्रशोभितकन्धरा ।
वटपत्रोदरा चैव निर्मला घनमण्डिता ॥ ६॥

मन्दावलोकिनी मध्या कुसुम्भवदनोज्ज्वला ।
तप्तकाञ्चनकान्त्याढ्या हेमभूषितविग्रहा ॥ ७॥

माणिक्यमुकुरादर्शजानुद्वयविराजिता ।
कामतूणीरजघना कामप्रेष्ठगतल्पगा ॥ ८॥

रक्ताब्जपादयुगला क्वणन्माणिक्यनूपुरा ।
वासवादिदिशानाथपूजिताङ्घ्रिसरोरुहा ॥ ९॥

वराभयस्फाटिकाक्षमालापुस्तकधारिणी ।
स्वर्णकङ्कणजालाभकराङ्गुष्ठविराजिता ॥ १०॥

सर्वाभरणभूषाढ्या सर्वावयवसुन्दरी ।
ऐङ्काररूपा ऐङ्कारी ऐश्वर्यफलदायिनी ॥ ११॥

क्लींङ्काररूपा क्लीङ्कारी क्लृप्तब्रह्माण्डमण्डला ।
सौःकाररूपा सौः कारी सौन्दर्यगुणसंयुता ॥ १२॥

सचामररतीन्द्राणी सव्यदक्षिणसेविता ।
बिन्दुत्रिकोणषट्कोणवृत्ताष्टदलसंयुता ॥ १३॥

सत्यादिलोकपालान्तदेव्यावरणसंवृता ।
ओड्याणपीठनिलया ओजस्तेजःस्वरूपिणी ॥ १४॥

अनङ्गपीठनिलया कामितार्थफलप्रदा ।
जालन्धरमहापीठा जानकीनाथसोदरी ॥ १५॥

पूर्णागिरिपीठगता पूर्णायुः सुप्रदायिनी ।
मन्त्रमूर्तिर्महायोगा महावेगा महाबला ॥ १६॥

महाबुद्धिर्महासिद्धिर्महादेवमनोहरी ।
कीर्तियुक्ता कीर्तिधरा कीर्तिदा कीर्तिवैभवा ॥ १७॥

व्याधिशैलव्यूहवज्रा यमवृक्षकुठारिका ।
वरमूर्तिगृहावासा परमार्थस्वरूपिणी ॥ १८॥

कृपानिधिः कृपापूरा कृतार्थफलदायिनी ।
अष्टात्रिंशत्कलामूर्तिः चतुःषष्टिकलात्मिका ॥ १९॥

चतुरङ्गबलादात्री बिन्दुनादस्वरूपिणी ।
दशाब्दवयसोपेता दिविपूज्या शिवाभिधा ॥ २०॥

आगमारण्यमायूरी आदिमध्यान्तवर्जिता ।
कदम्बवनसम्पन्ना सर्वदोषविनाशिनी ॥ २१॥

सामगानप्रिया ध्येया ध्यानसिद्धाभिवन्दिता ।
ज्ञानमूर्तिर्ज्ञानरूपा ज्ञानदा भयसंहरा ॥ २२॥

तत्त्वज्ञाना तत्त्वरूपा तत्त्वमय्याश्रितावनी ।
दीर्घायुर्विजयारोग्यपुत्रपौत्रप्रदायिनी ॥ २३॥

मन्दस्मितमुखाम्भोजा मङ्गलप्रदमङ्गला ।
वरदाभयमुद्राढ्या बालात्रिपुरसुन्दरी ॥ २४॥

बालात्रिपुरसुन्दर्या नाम्नामष्टोत्तरं शतम् ।
पठनान्मननाद्ध्यानात्सर्वमङ्गलकारकम् ॥ २५॥

इति श्रीबालाष्टोत्तरशतनामस्तोत्रं (२) सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Balashtottarashatanamastotram 2*

pdf was typeset on March 24, 2019

Please send corrections to *sanskrit@cheerful.com*